# AMRITA VIDYALAYAM

## ANNUAL EXAMINATION 2017 - '18

**Class : VIII** **Marks : 80**
**Time : 2½ hrs**

# संस्कृतम्

निर्देशा:
अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति।
प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
खण्ड: क – अपठित अवबोधनम् – 10
खण्ड: ख – रचनात्मक कार्यम् – 15
खण्ड: ग – अनुप्रयुक्त व्याकरणम् – 25
खण्ड: घ – पठित अवबोधनम् – 30

## खण्ड: क – अपठित अवबोधनम्

**I. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानां उत्तराणि लिखत।**

जीवने समय: एव सर्वाधिक: मूल्यवान् भवति। व्यतीतस्य समयस्य एकम् अपि क्षणं केनापि प्रयत्नेन पुन: प्राप्तुं न शक्नोति कोऽपि जन:। अत: प्रत्येकं क्षणस्य सदुपयोग: सावधानेन मनसा करणीय: सर्वै: जनै: विशेषत: विद्यार्थिभि:। यथा वयं अर्जितस्य धनस्य एकैकस्य पणस्य व्ययं सम्यक् विचार्य कुर्म: तथैव एकैकस्य क्षणस्य अपि सदुपयोगं विवेकेन कुर्याम। एक: अपि क्षण: वृथा न यापनीय:। असावधानतया आलस्येन च निरर्थकं नीत: समय: पश्चात्तापस्य असफलताया: च कारणं भवति। य: मानव: समयस्य महत्वं अवगच्छति तस्य सदुपयोगं च करोति स एव महान् भवति।

**1. एक पदेन उत्तरत।** **2**
क. मानव: कस्य सदुपयोगं कृत्वा महान् भवति?
ख. सर्वाधिक: मूल्यवान् क:?
ग. एकैकस्य क्षणस्य सदुपयोगं केन कुर्याम?
घ. किम् व्यतीत: समय: पुन: प्राप्तुं न शक्यते?

**2. पूर्णवाक्येन उत्तरत।** **4**
क. निरर्थकं नीत: समय: कस्य कारणं भवति?
ख. प्रत्येकं क्षणस्य उपयोग: कथं करणीय:?

**3. भाषिककार्यम्।** **2**
क. 'कुर्म:' इति क्रियापदस्य कर्तृपदं किम्?

(विचार्य, सम्यक्, वयं, व्यायम्)

ख. 'मनसा' इति पदस्य विशेषणपदं गद्यांशे किम् प्रयुक्तम्?
(सावधानेन, सदुपयोगः, करणीयः, प्रत्यकं)

ग. 'उद्यमेन' इति पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम्?
(सावधानेन, विवेकेन, आलस्येन, प्रयत्नेन)

घ. 'सञ्चितस्य' इति पदस्य पर्यायपदं गद्यांशे किम् प्रयुक्तम्?
(अर्जितस्य, पणस्य, व्यतीतस्य, क्षणस्य)

**4. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** **2**

## खण्डः ख – रचनात्मक लेखनम्

**II. चित्रं दृष्ट्वा मञ्जूषातः प्रदत्तपदानां सहायतया संस्कृते पञ्चवाक्यानि रचयत।10**



मञ्जूषा

| |
|---|
| परिवारस्य, आसन्दिका, फलानि, कुर्वन्ति, जलम्, सदस्याः, तिष्ठन्ति, स्थाल्याम्, पात्राणि, बालकः, पश्यति, प्रसन्नचित्ता, हस्ते, जलपात्रम्, मञ्चके, दृश्यन्ते। |

अथवा

'ग्रामीण-जीवनं' इति विषयं अधिकृत्य मञ्जूषातः पदानि चित्वा संस्कृते पञ्च वाक्यानि लिखत।

मञ्जूषा

| |
|---|
| शिक्षिताः, जनाः सर्वसुविधासम्पन्नाः, क्षेत्राणि, सिञ्चन्ति, अपि, विद्यालयः वैज्ञानिकविधिना, अस्ति, कुर्वन्ति, कृत्रिम, पठन्ति, हरीतिमा, सर्वत्र, प्रदूषणरहितम्। |

**III. भवान् सुरेशः। भवता स्वमित्रं सिद्धान्तं प्रति परीक्षायां सफलतायै लिखिते वर्धापनपत्रे मञ्जूषातः रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत। 5**

दिल्लीतः

तिथिः 7.9.2013

प्रिय सिद्धान्त!

1. --------।

अत्र कुशलं तत्रास्तु। 2. ------ परीक्षायाः सफलतायाः पत्रं अधुनैव 3. -------। भवतः परीक्षापरिणामं ज्ञात्वा अति 4. ---------- अभवत्। अहर्निशं प्रयासं कृत्वा भवान् प्रतिशतं 5. -------- लब्धवान्। त्वं मम परिवारस्य 6. ---------- अर्हसि। अहं 7. ---------- पुनः वर्धापनं 8. ----------। 9. --------- सादरं नमः।

भवतः 10. ----------।

सुरेशः

मञ्जूषा

| |
|---|
| संतोषः, पितृभ्यां, अङ्कान्, भवतः, कामये, प्राप्तं, साधुवादन्, तुभ्यं, सप्रेम नमस्ते, मित्रम् |

## खण्डः ग – अनुप्रयुक्त व्याकरणम्

**IV. उचित संख्यापदेन रिक्तस्थानानि पूरयत।** **4**

1. मम विद्यालयस्य -------- (78) अध्यापकाः परिश्रमेण अस्मान् पाठयन्ति।
2. तत्र --------- (96) जनाः उपविशन्ति।
3. वाटिकायां ------- (44) आम्रवृक्षाः सन्ति।
4. अस्माकं विद्यालयस्य वार्षिकोत्सवे --------- (51) छात्राः भागं गृहीतवन्तः।

**V. रिक्त स्थानानि उचित रूपेण पूरयत।** **5**

| | | | |
|---|---|---|---|
| 1. | -------- | --------- | मातृभिः। |
| 2. | तस्यै | --------- | ----------। |
| 3. | अस्य | --------- | -----------। |
| 4. | -------- | --------- | अयच्छत। |
| 5. | -------- | --------- | पिबन्तु। |

**VI. मञ्जूषायाः उचितम् अव्ययपदं चित्वा वाक्यानि पूरयत।** **5**

(मा, श्वः, बहिः, नूनं, विना)

1. भक्ताः अत्र --------- आगमिष्यन्ति।
2. परिश्रमेण ---------- कुत्र साफल्यम्।
3. अस्माभिः ---------- वृक्षारोपणं करणीयम्।
4. ध्वनि प्रदूषणं --------- करणीयम्।
5. नगरात् ------ एकं विशालं उपवनं अस्ति।

**VII. एतेषां विभक्ति वचनं च लिखत।** **4**

1. संस्थासु 2. आत्मनः 3. मह्यं 4. प्रकृतेः

**VIII. रेखाङ्कितपदेषु प्रकृति-प्रत्ययौ संयोज्य-विभज्य वा लिखत।** **3**

1. राज्ञः सभायां नश्वर-शरीरस्य महत्वं अवगम्य हसन्ति जनाः।
2. अम्बा पायसं पच् + क्तवतु।
3. केनचित् कीटेन दंशनं कृतम्।

**IX. उचित विभक्तिं उपयुज्य वाक्यं पूरयत।** **4**

1. --------- प्रकाशेन अन्धकारः नश्यति। (सूर्यः)
2. ---------- नमः। (पितृ)
3. रमा -------- पुष्पाणि आनयति। (वाटिका)
4. रामः --------- सह पुस्तकालयं गच्छति। (मित्रं)

## खण्ड घ – पठित अवबोधनम्

**X. अधोलिखित गद्यांशं पठित्वा प्रश्नानां उत्तराणि संस्कृतेन लिखत।**

मीनस्य नासिका अपि न भवति तथापि घ्राणस्य शक्तिः भवति। घ्राणेन सः शत्रुमित्रयोः ज्ञानं करोति। महदाश्चर्यम्। प्रश्नः उत्पद्यते यत् यदि मीनस्य नासिका न भवति तर्हि श्वासं कथं स्वीकरोति? जले बहवः पदार्थाः मिश्रिताः भवन्ति तेषु प्राणवायुः अपि। मीनस्य गलः सर्वदा कम्पते। तस्य कारणं अस्ति मीनः गले जलं पूरयति। मीनस्य गले विशिष्टाः शिरा भवन्ति याभिः जले मिश्रितं प्राणवायुं मीनः चूषति।

**1. एकपदेन उत्तरत।** **2**

क. कस्य नासिका न भवति?

ख. बहवः पदार्थाः कुत्र मिश्रिताः भवन्ति?

ग. केन शत्रुमित्रयोः ज्ञानं करोति?

घ. मीनः कुत्र जलं पूरयति?

**2. पूर्णवाक्येन उत्तरत।** **1**

क. मीनः प्राणवायुं कथं चूषति?

**3. भाषिककार्यम्।** **2**

क. "मीनस्य गले विशिष्टाः शिराः भवन्ति"।
'भवन्ति' इति क्रियापदस्य कर्तृपदं?
(मीनस्य, विशिष्टाः, शिराः, गले)

ख. 'कण्ठः' इति पदस्य समानपदं अनुच्छेदात् लिखत।
(घ्राणः, शिराः, गलः, नासिका)

**XI. अधोलिखित पद्यांशं पठित्वा पदत्त प्रश्नानां उत्तराणि लिखत।**

वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णान्यन्यानि
संयाति नवानि देही ॥

**1. एकपदेन उत्तरत।** **1**

क. कः जीर्णानि वासांसि परित्यजति?

**2. पूर्णवाक्येन उत्तरत।** **1**

क. केन जीर्णानि शरीराणि विहाय नवानि देही संयाति?

**3. भाषिककार्यम्।** **3**

क. 'त्यक्त्वा' इति पदस्य कोऽर्थः अत्र प्रयुक्तः?

ख. 'जीर्णान्यन्यानि' सन्धिच्छेदं कुरुत।

ग. 'विहाय' इति पदस्य प्रत्ययं लिखत।

**XII. अधोलिखत नाट्यांशं पठित्वा प्रश्नानां उत्तराणि लिखत।**

पुत्रः - अद्य कः विशेषः?

अम्बा - अद्य रामनवमी भोः। अतः पायसं पचितवती।

पुत्रः - अम्ब! अद्य शाके लवणमेव न स्थापितवती। लवणं ददातु।

अम्बा - अहो विस्मृतवती। स्वीकरोतु लवणम्।

पुत्रः - अम्ब! सूपः कटुः अस्ति। अतः जम्बीरं आवश्यकं।

अम्बा - वत्स! पायसं कथमस्ति?

भगिनी पायसं रुचिकरं परं तक्रं आम्लम् अस्ति।

पिता - मह्यं इतोऽपि शाकं ददातु। पूर्वं शाकस्य स्वादः उत्तमः नासीत्। यतः तत्र लवणमेव नासीत्। इदानीं सम्यक् अस्ति।

पुत्रः - जलं आनयतु। अम्ब! अद्य भोजनं स्वादिष्टम् अस्ति। एतादृशमेव भोजनं प्रतिदिनं पचतु। बहु आनन्दम् अभवत्।

**1. एकपदेन उत्तरत।** **1**

क. कस्य स्वादः आम्लः अस्ति?

ख. पुत्रः कीदृशं भोजनं प्रतिदिनं इच्छति?

**2. पूर्णवाक्येन उत्तरत।** **1**

क. शाकस्य स्वादः किमर्थं उत्तमः नासीत्?

**3. भाषिककार्यम्।** **3**

क. 'जम्बीरम् आवश्यकं' इत्यनयोः पदयोः विशेषणपदं किम्?

ख. एकम् 'अव्ययपदं' नाट्यांशात् चित्वा लिखत।

ग. 'मधुरम्' इत्यस्य विपरीतपदं किम्?

**XIII. रेखाङ्कितेषु पदेषु सन्धिं वा सन्धिच्छेदं वा कृत्वा लिखत।** **3**

1. वीतरागभयक्रोधः <u>स्थितधीर्मुनिरुच्यते</u>।
2. सः <u>बाल्यकालात् + एव</u> प्रतिभासम्पन्नः छात्रः आसीत्।
3. <u>मशको + अहं</u>। मलिनजले मम वासः।

**XIV. अधोलिखित वाक्यानां संशोधनं कृत्वा वाक्यानि पुनः लिखत।** **3**

1. पुष्पाणि मनोहरम् अस्ति।
2. सः नोबलपुरस्कारेण पुरस्कृताः।
3. वाटिकायां के अस्ति?

**XV. निम्नलिखित श्लोकस्य अन्वयं लिखत।** **3**

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।
अहङ्कार विमूढात्मा कर्ताहमिति मन्यते ॥

अन्वयः

प्रकृतेः क्रियमाणानि 1. ---------- कर्माणि सर्वशः 2. ---------- विमूढात्मा 3. --------- इति मन्यते।

**XVI. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत।** **3**

1. सः तारकाणां अध्ययनं कृतवान्।
2. मीने स्पर्शेन अवगमनस्य शक्ति भवति।
3. मशकस्य मनसि लोभः सञ्जातः।

**XVII. शुद्धम् अर्थम् चिनुत।** **3**

1. मशकस्य वारं-वारं अनुनयं श्रुत्वा मत्कुणाः उक्तवान्।
   (वचनं, पुनः, आकर्ण्य, अतिथिः)
2. पण्डिताः न अनुशोचन्ति।
   (जनाः, कुशलाः, विचक्षणाः, प्रसिद्धः)
3. भोजनं स्वादिष्ठम् अस्ति।
   (आनन्दं, शीघ्रं, सम्यक्, रुचिकरं)